Amritanilayam Stotras

???? ????? ???? ?????????

ॐ उदयगिरिमुपेतं भास्करं पद्महस्तं
सकलभुवननेत्रं रत्नरज्जूपमेयम् ।
तिमिरकरिमृगेंद्रं बोधकं पद्मिनीनां
सुरवरमभिवंद्यं सुंदरं विश्वदीपम् ॥ 1 ॥

ॐ शिखायां भास्कराय नमः ।
ललाटे सूर्याय नमः ।
भ्रूमध्ये भानवे नमः ।
कर्णयोः दिवाकराय नमः ।
नासिकायां भानवे नमः ।
नेत्रयोः सवित्रे नमः ।
मुखे भास्कराय नमः ।
ओष्ठयोः पर्जन्याय नमः ।
पादयोः प्रभाकराय नमः ॥ 2 ॥

ॐ ह्रां ह्रीं ह्रूं ह्रैं ह्रौं ह्रः ।
ॐ हंसां हंसीं हंसूं हंसैं हंसौं हंसः ॥ 3 ॥

ॐ सत्यतेजोज्ज्वलज्वालामालिने मणिकुंभाय हुं
फट् स्वाहा ।
ॐ स्थितिरूपककारणाय पूर्वादिग्भागे मां रक्षतु ॥
4 ॥

ॐ ब्रह्मतेजोज्ज्वलज्वालामालिने मणिकुंभाय हुं
फट् स्वाहा ।
ॐ तारकब्रह्मरूपाय परयंत्र -परतंत्र -परमंत्र -
सर्वोपद्रवनाशनार्थं दक्षिणदिग्भागे मां
रक्षतु ॥ 5 ॥

ॐ विष्णुतेजोज्ज्वलज्वालामालिने मणिकुंभाय हुं
फट् स्वाहा ।
ॐ प्रचंडमार्तांड उग्रतेजोरूपिणे मुकुरवर्णाय
तेजोवर्णाय मम सर्वराजस्त्रीपुरुष -वशीकरणार्थं
पश्चिमदिग्भागे मां रक्षतु ॥ 6 ॥

ॐ रुद्रतेजोज्ज्वलज्वालामालिने मणिकुंभाय हुं
फट् स्वाहा ।
ॐ भवाय रुद्ररूपिणे उत्तरदिग्भागे
सर्वमृत्योपशमनार्थं मां रक्षतु ॥ 7 ॥

ॐ अग्नितेजोज्ज्वलज्वालामालिने मणिकुंभाय हुं
फट् स्वाहा ।
ॐ तिमिरतेजसे सर्वरोगनिवारणाय ऊर्ध्वदिग्भागे
मां रक्षतु ॥ 8 ॥

ॐ सर्वतेजोज्ज्वलज्वालामालिने मणिकुंभाय हुं
फट् स्वाहा ।
ॐ नमस्कारप्रियाय श्रीसूर्यनारायणाय
अधोदिग्भागे सर्वाभीष्टसिद्ध्यर्थं मां रक्षतु
॥ 9 ॥

मार्तांडाय नमः भानवे नमः
हंसाय नमः सूर्याय नमः
दिवाकराय नमः तपनाय नमः
भास्कराय नमः मां रक्षतु ॥ 10 ॥

मित्र -रवि -सूर्य -भानु -खगपूष -हिरण्यगर्भ -
मरीच्यादित्य -सवित्रर्क -भास्करेभ्यो नमः
शिरस्थाने मां रक्षतु ॥ 11 ॥

सूर्यादि नवग्रहेभ्यो नमः ललाटस्थाने मां रक्षतु
॥ 12 ॥

धराय नमः धृवाय नमः
सोमाय नमः अथर्वाय नमः
अनिलाय नमः अनलाय नमः
प्रत्यूषाय नमः प्रतापाय नमः
मूर्ध्निस्थाने मां रक्षतु ॥ 13 ॥

वीरभद्राय नमः गिरीशाय नमः
शंभवे नमः अजैकपदे नमः
अहिर्बुध्ने नमः पिनाकिने नमः
भुवनाधीश्वराय नमः दिशांतपतये नमः
पशुपतये नमः स्थाणवे नमः
भवाय नमः ललाटस्थाने मां रक्षतु ॥ 14 ॥

धात्रे नमः अंशुमते नमः
पूष्णे नमः पर्जन्याय नमः

विष्णवे नमः नेत्रस्थाने मां रक्षतु ॥ 15 ॥

अरुणाय नमः सूर्याय नमः
इंद्राय नमः रवये नमः
सुवर्णरेतसे नमः यमाय नमः
दिवाकराय नमः कर्णस्थाने मां रक्षतु ॥ 16 ॥

असितांगभैरवाय नमः रुरुभैरवाय नमः
चंडभैरवाय नमः क्रोधभैरवाय नमः
उन्मत्तभैरवाय नमः भीषणभैरवाय नमः
कालभैरवाय नमः संहारभैरवाय नमः
मुखस्थाने मां रक्षतु ॥ 17 ॥

ब्राह्म्यै नमः महेश्वर्यै नमः
कौमार्यै नमः वैष्णव्यै नमः
वराह्यै नमः इंद्राण्यै नमः
चामुंडायै नमः कंठस्थाने मां रक्षतु ॥ 18 ॥

इंद्राय नमः अग्नये नमः
यमाय नमः निर् ऋतये नमः
वरुणाय नमः वायवे नमः
कुबेराय नमः ईशानाय नमः
बाहुस्थाने मां रक्षतु ॥ 19 ॥

मेषादिद्वादशराशिभ्यो नमः हृदयस्थाने मां
रक्षतु ॥ 20 ॥

वज्रायुधाय नमः शक्त्यायुधाय नमः
दंडायुधाय नमः खड्गायुधाय नमः
पाशायुधाय नमः अंकुशायुधाय नमः
गदायुधाय नमः त्रिशूलायुधाय नमः
पद्मायुधाय नमः चक्रायुधाय नमः
कटिस्थाने मां रक्षतु ॥ 21 ॥

मित्राय नमः दक्षिणहस्ते मां रक्षतु ।
रवये नमः वामहस्ते मां रक्षतु ।
सूर्याय नमः हृदये मां रक्षतु ।
भानवे नमः मूर्ध्निस्थाने मां रक्षतु ।
खगाय नमः दक्षिणपादे मां रक्षतु ।
पूष्णे नमः वामपादे मां रक्षतु ।
हिरण्यगर्भाय नमः नाभिस्थाने मां रक्षतु ।
मरीचये नमः कंठस्थाने मां रक्षतु ।

आदित्याय नमः दक्षिणचक्षूषि मां रक्षतु ।
सवित्रे नमः वामचक्षुषि मां रक्षतु ।
भास्कराय नमः हस्ते मां रक्षतु ।
अर्काय नमः कवचे मां रक्षतु ॥ 22

ॐ भास्कराय विद्महे महाद्युतिकराय धीमहि । तन्नो
आदित्यः प्रचोदयात् ॥ 23 ॥

इति श्री सूर्य पंजर स्तोत्रम् ॥

Sri Amritananda Natha Guruvu Garu, Amrita Nilayam, Gowravaram Village & Post, Kavali Mandal, Nellore District, Andhra Pradesh.
Phone Number: +91 9493475515 | www.amritanilayam.org